
# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 01/03/2012 | Typing Started on | H K Srinivasa Rao |
| 2 | 01/03/2012 | Typing Ended on | H K Srinivasa Rao |
| 3 | | I Proof Reading & Correction | M S Venugopal & H K Srinivasa RAo |
| 4 | 14/08/2012 | II Proof Reading & Correction | Pavan BS & H K Srinivasa Rao |
| | | | |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of sri Acharya Madhwa. It is a humble effort to make available this Great work to sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, skype Id: SRKARC6070*

*Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

"ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ"

ಗ್ರಂಥ ಋಣ:ಆಚಾರ್ಯ ಪ್ರಭಞ್ಜನರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳು

# ॥ तत्त्वविवेकः ॥

स्वतन्त्रं परतन्त्रं च प्रमेयं द्विविधं मतम् ।

स्वतन्त्रो भगवान् विष्णुर्निर्दोषाखिलसद्गुणः ॥ 01 ॥

द्विविधं परतन्त्रं च भावोऽभाव इतीरितः ।

पूर्वापरसदात्वेन त्रिविधोऽभाव इष्यते ॥ 02 ॥

भावाभाव स्वरूपत्वान्नान्योन्याभावता पृथक् ।

चेतनोऽचेतनश्चेति भावश्च द्विविधः स्मृतः ॥ 03 ॥

नित्यमुक्तश्च सृतियुक् परतन्त्रोऽपि चेतनः ।

द्विधैव श्रीर्नित्यमुक्ता सृतियुक् च द्विधा मतः ॥ 04 ॥

मुक्तोऽमुक्त इति ह्यत्र ब्रह्मान्ता उत्तरोत्तरम् ।

मुक्ताः शतगुणाः प्रोक्ता रमा तेभ्योऽखिलैर्गुणैः ॥ 05 ॥

नित्यं बहुगुणोद्रिक्ता ततोऽनन्तोगुणो हरिः ।

अमुक्तास्त्रिविधास्तत्र नीचमध्योच्चभेदतः ॥ 06 ॥

मुक्तियोग्यास्तत्र चोच्चा नित्यावर्तास्तु मध्यमाः ।

नीचा नित्यतमोयग्या द्विधैवाचेतनं मतम् ॥ 07 ॥

नित्यानित्यत्वभेदेन देशः कालः श्रुतिस्तथा ।
भूतेन्द्रियप्राणगुणसूक्ष्मरूपं च नित्यकम् ॥ 08 ॥

एषां विकारोऽनित्यः स्यान्नित्या एव हि चेतनाः ।
गुणक्रियाजातिपूर्वा धर्माः सर्वेऽपि वस्तुनः ॥ 09 ॥

रूपमेव द्विधं तच्च यावद्वस्तु च खण्डितम् ।
खण्डिते भेद ऐक्यं च यावद्वस्तु न भेदवत् ॥ 10 ॥

खण्डितं रूपमेवात्र विकारोऽपि विकारिणः ।
कार्यकारणयोश्चैव तथैव गुणतद्वतोः ॥ 11 ॥

क्रियाक्रियावतोस्तद्वत् तथा जातिविशेषयोः ।
विशिष्टशुद्धयोश्चैव तथैवांशांशिनोरपि ॥ 12 ॥

य एतत् परतन्त्रं तु सर्वमेव हरेः सदा ।
वशमित्येव जानाति संसारान्मुच्यते हि सः ॥ 13 ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचित तत्त्वविवेकः ॥

॥ मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥
॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम् ॥